**PAPER - 1**

# MT

**2018 .... .... 1100** **Seat No.** | | | | | | | |

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - PRELIM - I PAPER - I**

**Time : 2 Hours** **(Pages 7)** **Marks : 40**

**प्रथमः विभागः - गद्यम् ।**

**प्र.१ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं कारणं चित्वा वाक्यं पुनर्लिखत । १

नदीजले पापं सङ्कलितं नास्ति यतः ......... ।

(नदी जलं सागरे उत्सृजति । / नदी पापं प्रक्षालयति ।)

(ii) कः कं वदति ? अनन्तरं तस्य किं भवतीति न जानेऽहमिति । १

(iii) वाक्यं पुनर्लिखित्वा सत्यं वा असत्यमिति लिखत । १

सागरः पापं सूर्याय ददाति ।

कश्चन गोन्दिया–निवासी यात्री एकदा काशीनगरं जगाम। काशी मोक्षदायिनी नगरी इत्यनेन श्रुतमासीत्। काशीं प्राप्य गङ्गातीरे अटन् स चिन्तितवान् यत् कोऽपि नरः अस्मिन् गङ्गाजले निमज्यात्मानं पापमुक्तमिति भावयति । गङ्गाजले निमग्ने सति सत्यं स पापमुक्तो भवति वा न वा ? जनानां पापक्षालनेन एतावत् कालपर्यन्तं नदीजले कियत् पापं सङ्कलितं स्यादिति । अन्येद्युः साशङ्कमनाः स गङ्गातीरं गत्वा गङ्गानदीं पृष्टवान्, हे गङ्गादेवि, अहर्निशं जनानां पापक्षालनं करोषि। तेन भवत्याः जलं निश्चितं पापमयं वर्तते । तर्हि भवती अस्य पापमयजलस्य किं करोतीति ? तन्निशम्य गङ्गा उक्तवती, रे यात्रिन् यदाऽहं सागरं मिलामि तदा सर्वमेतत्पापमयं जलं तस्मिन्नेव उत्सृजामि । अनन्तरं तस्य किं भवतीति न जानेऽहमिति। तदा तद् ज्ञातुमुत्सुकोऽसौ यात्री सागरतीरं गतवान् तत्र च सागरं पृष्टवान्, रे सागर, सर्वाः नद्यः स्वजलस्थितं पापं त्वयि निक्षिपन्ति । तेन त्वं पापाकरः वा पापधिरेव भवसि न वेति। सागर उक्तवान्, न हि, यदा नद्यः पापमानयन्ति तदहं गृह्णामीति सत्यम् । किन्तु सूर्यकिरणैः तस्य जलस्य बाष्पं भवति । बाष्पीभूतस्य पापजलस्य तदनन्तरं किं भवतीति न जाने इति ।

**२. स्वमतप्रकटनम् ।** २

नद्याः जलं पापक्षालनं करोति वा न इति माध्यमभाषया स्पष्टीकुरुत ।

**प्र.१ ब) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

**१. अवबोधनम् । (केऽपि २ कृती कुरुत ।)**

(i) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । १

१) तृतीयम् आश्चर्यं नाम ........... । (मिस्रदेशः / पिरॅमिडरचना / गिझापिरॅमिडरचना)

२) मायासंस्कृतेः प्रतीकरूपा नगरी नाम ........... । (मेक्सिकोदेशः / पेट्रा / चिचेन् इट्झा)

(ii) पूर्णवाक्येन उत्तरं लिखत । १
कोलोसिअम् नाम किम्?

(iii) वाक्यं पुनर्लिखित्वा योग्यं वा अयोग्यमिति लिखत । १
तारकः दुःखं दूरीकरोति ।

प्रथमाश्चर्यं रोमनगरभूषणं कोलोसिअम्-फेव्हिन-अम्फीथिएटरम् एतद् अर्धवर्तुलाकारं प्रेक्षागृहं सम्राट्-व्हेसॅशियनमहोदयेन निर्मितम् । द्वितीयमाश्चर्यं नाम चीनदेशस्थिता मृत्पाषाणेष्टिकामयी विशाला भित्तिः । उत्तरकाष्ठास्थितशत्रोः रक्षणार्थं शिंगहाउन-टी-नृपेण निर्मितैषा । त्वं जानास्येव । यद् मिस्रदेशः पिरॅमिडरचनार्थं जगति विख्यातः । एतासु पिरॅमिडरचनासु गिझापिरॅमिडरचना सप्ताश्चर्येषु एकतमा । एतदभिमानास्पदं यद् चतुर्थाश्चर्यं भारतभूमावेव स्थितम् । शाहजहानसम्राजा स्वपत्नीस्मरणार्थं विनिर्मितमेतत् शिल्पं भारतीयस्थापत्यकलायाः अनुपमेयं प्रतीकम् । पौर्णिमायां रात्रौ चन्द्रज्योत्स्नाधवलितस्यैतस्य ताजमहालस्य शोभा अवर्णनीया केवलं स्वसंवेद्या च । पञ्चममाश्चर्यं नाम ब्राझिलदेशे 'रिओ-डि-जानिरोनगरसमीपे पर्वतस्थः ख्रिस्त-दि-रिडिमर' इति पुत्तलः । रिडिमर नाम तारकः एषः क्रुसाकारे विराजते । मेक्सिकोदेशे विराजमाना 'मायासंस्कृतेः प्रतीकरूपा 'चिचेन् इट्झा' नाम पुरातनी नगरी विश्वस्य षष्ठाश्चर्यम्। अपि ज्ञायते त्वया यद् मायासंस्कृतिरतिप्राचीना विकसिता चासीत् । जार्डनदेशस्था प्राचीना नगरी पेट्रा आश्चर्यगणेषु सप्तमा ।

२. **पृथक्करणम् ।** २
**जालचित्रं पूरयत ।**

....... आश्चर्यम्
....... -नृपेण निर्मिता — विशाला भित्तिः — ...... मयी
....... - देशस्थिता

**प्र.१ क) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

१. **शब्दज्ञानम् । (केऽपि २ कृती कुरुत ।)**

(i) समूहेतरपदं लिखत । १
१) सन्तुष्टः, प्रसन्नः, खिन्नः, तुष्टः ।
२) आपणिकः, वस्तुविक्रेता, वणिक्, ग्राहकः ।

(ii) गद्यांशात् आगते विशेषणे चित्वा लिखत । १
............. परिमाणानि ।, ................ दण्डः ।

(iii) गद्यांशे आगते द्वे धातुसाधित - त्वान्त - अव्यये चित्वा लिखत । १

| | |
|---|---|
| मधुरा | - अम्ब,नैष सम्यक् तोलयति । तोलनार्थं सम्यक् परिमाणमपि न योजयति । परिमाणस्थाने पाषाणखण्डं योजयति । |
| माता | - मधुरे, सत्यं वदसि । नावलोकितं मया । किं रे, तव समीपे ISI चिह्नाङ्कितानि परिमाणानि न सन्ति ? परिमाणानां स्थाने पाषाणखण्डानामुपयोजनं न विधियुक्तम् । तुलायाः दण्डोऽपि त्रुटितः । अतः वस्तूनां तोलनमपि सम्यग् न भवति । जानासि किम्? यदि ग्राहकमञ्चमभिगच्छामि तर्हि शाकविक्रय - अनुज्ञापत्रादपि त्वं वञ्चितो भवसि । |
| मधुरा | - कः एष मञ्चः ? रङ्गमञ्चः श्रुतः मया, न तु ग्राहकमञ्चः । |
| माता | - ग्राहकहिताय ग्राहकसुखाय च चतुःसप्तनवैकतमे (1974) संवत्सरे स्थापिता एषा संस्था। 'ग्राहकपञ्चायत' 'ग्राहकमञ्च' वा इति नाम्ना ज्ञायते । ग्राहकाणां ग्राहकैः ग्राहकार्थं निर्मितः एष मञ्चः ग्राहकहितायैव बद्धपरिकरो वर्तते । |
| द्वितीयः शाकविक्रेता | - यदि ग्राहकः विक्रेयवस्तुविषये सन्तुष्टः न भवति तर्हि ग्राहकन्यायालयं गन्तुं तस्य अधिकारो भवति । अतः मम परिमाणानि गृहीत्वा शाकं सम्यक् तोलय । |
| माता | - युक्तमुक्तं भवता । |
| प्रथमः शाकविक्रेता | - (तोलयित्वा ददाति) गृह्णातु भवती । क्षम्यताम् । |
| माता | - कथं प्लास्टिकस्यूतं ददासि ? वस्त्रस्यूतः मत्समीपे वर्तते । |

२. **पृथक्करणम् ।**

क्रमसंयोजनम् । २

(i) पाषाणखण्डस्य उपयोजनम् ।

(ii) विक्रेतुः प्लास्टिकस्यूतस्य उपयोजनम् ।

(iii) विक्रेतुः असम्यक् तोलनम् ।

(iv) विक्रेतुः ग्राहकाधिकारविषये ज्ञानम् ।

## द्वितीयः विभागः - पद्यम् ।

**प्र.२ अ) पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

१. **पृथक्करणम् ।** २

| द्रुमाः | वेतसः |
|---|---|
| | |

(कायिनः, कूलजः, समूलशाखाः, अल्पसारः)

समूलशाखान् पश्यामि निहतान् कायिनो द्रुमान् ।
युष्माभिरिह पूर्णाभिर्नद्यस्तत्र न वेतसम् ।।१।।
अकायश्चाल्पसारश्च वेतसः कूलजश्च वः ।
अवज्ञया वा नानीतः किं च वा तेन वः कृतम् ।।२।।
कुम्भकारस्त्वं मृत्तिका अहं मूर्तिकारस्त्वं पाषाणोऽहम् ।
तव हस्ताभ्यां मम निर्माणं कदापि मा भूत् ते विस्मरणम् ।।३।।
माऽस्तु धनं मौक्तिकं काञ्चनम् अस्तु अविरतं तव प्रसादनम् ।
त्वत्स्पर्शान्मे भवतु सुवर्णं गुरुचरणाभ्यां सदा वन्दनम् ।।४।।

२. **शब्दज्ञानम् ।**

पर्यायपदं मेलयत । १

| अ | ब |
|---|---|
| १) वन्दनम् | सततम् । |
| २) पाषाणः | सुवर्णम् । |
| ३) धनम् | शिला । |
| ४) काञ्चनम् | द्रविणम् । |
| | नमनम् । |

प्र.२ ब) **पद्यांशान् पठित्वा निर्दिष्टे कृती कुरुत ।**

शस्त्रैर्हतास्तु रिपवो न हता भवन्ति
प्रज्ञाहताश्च नितरां सुहता भवन्ति ।
शस्त्रं निहन्ति पुरुषस्य शरीरमेकम्
प्रज्ञा कुलं च विभवं च यशश्च हन्ति ।।१।।
भोजनान्ते पिबेत्तक्रं वासरान्ते पिबेत् पयः ।
निशान्ते च पिबेद्वारि त्रिभी रोगो न जायते ।।२।।
अत्यम्बुपानान्न विपच्यतेऽन्नं निरम्बुपानाच्च स एव दोषः ।
तस्मान्नरो वह्निविवर्धनाय मुहुर्मुहुर्वारि पिबेदभूरि ।।३।।

१. **अवबोधनम् ।**

पूर्णवाक्येन उत्तरत । १

कस्मात् कारणात् अन्नं न विपच्यते ?

२. **तात्पर्यलेखनम् ।** २

'शस्त्रैर्हतास्तु ....... यशश्च हन्ति ।।' इति श्लोकस्य तात्पर्यं माध्यमभाषया लिखत ।

**प्र.२ क) स्मरणम् ।**

**सुभाषितं शुद्धं पूर्णं च लिखत । (केवलं १ श्लोकः लेखनीयः ।)** २

(i) गुणी ....... मूषकः।।

(ii) याममध्ये ....... ०युग्माद्बलक्षयः ।।

**प्र.२ ड) श्लोकांशान् मेलयत ।** २

| | |
|---|---|
| (i) पित्तं यदि शर्करया | इतरे च स्वशक्तितः । |
| (ii) तृणात्सञ्जायते क्षीरं | शीलमेतत्प्रशस्यते । |
| (iii) पञ्चैते गृहिणा पोष्या | शाम्यति कोऽर्थः पटोलेन । |
| (iv) अद्रोहः सर्वभूतेषु | क्षीरात्सञ्जायते विषम् । |
| | कर्मणा मनसा गिरा । |

**तृतीयः विभागः - व्याकरणम् ।**

**प्र.३ यथानिर्देशं कृतीः कुरुत । (केवलं ५ उपप्रश्नाः लेखनीयाः ।)** २

**अ) नाम/सर्वनामपदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

| | सम्बोधन एकवचन | सप्तमी एकवचन | प्रथमा बहुवचन |
|---|---|---|---|
| नाम | | | |
| सर्वनाम | | | |

(अनुसारिणः, यस्याम्, गङ्गादेवि, इमे, सर्व, मनसि)

**आ) क्रियापदानां पृथक्करणम् । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| द्वितीयः भविष्यकालः | परोक्षः भूतकालः | प्रथमः भूतकालः | विध्यर्थः | वर्तमानकालः | आज्ञार्थः |
|---|---|---|---|---|---|
| | | | | | |

(जानीयात्, गृहाण, अभुनक्, द्रक्ष्यति, बभूव, दत्ते)

**इ) समासाः । समस्तपदानां समासनामभिः सह मेलनं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

| | **समस्तपदम्** | **समासनाम** |
|---|---|---|
| (i) | लोकप्रियः | बहुव्रीहि समास |
| (ii) | वैधाचारः | नञ् तत्पुरुष समास |
| (iii) | अल्पसारः | सप्तमी तत्पुरुष समास |
| (iv) | अवर्णनीया | षष्ठी तत्पुरुष समास |
| (v) | साशङ्कम् | कर्मधारय समास |
| (vi) | मूलशाखान् | अव्ययीभाव समास |
| | | इतरेतर द्वन्द्व समास |

**ई) उपपदविभक्तिः ।** २

**उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत । (केऽपि ४ पर्यायाः लेखनीयाः ।)**

(i) ........ साकं जनकः ग्रामं गच्छति । (पुत्रम् / पुत्रेण / पुत्रस्य)

(ii) ....... नमः । (गणपतिम् / गणपति / गणपतये)

(iii) ....... बहिः कूपः अस्ति । (गृहात् / गृहस्य / गृहे)

(iv) सर्वे जनाः ........ अतीव स्निह्यन्ति । (मातृभूमिम् / मातृभूमौ / मातृभूमि)

(v) ....... उपरि हिमं वर्तते । (हिमालयस्य / हिमालये / हिमालयम्)

(vi) अलं ........ । (असत्यभाषणम् / असत्यभाषणेन / असत्यभाषणे)

**उ) सन्धिं / सन्धिविग्रहं कुरुत । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) .......... = पुनः + एकवारम् ।

(ii) भवनञ्च = .......... + च ।

(iii) अस्यैव = अस्य + .......... ।

(iv) एतन्निशम्य = .......... + निशम्य ।

(v) .......... = एतत् + एव ।

(vi) सच्छीलः = सत् + .......... ।

**ऊ) सङ्ख्यावाचकविशेषणानि - रिक्तस्थानपूर्तिः । (केऽपि ४ पर्यायाः लेखनीयाः ।)** २

(i) पुनः ................ अर्जुनः तमेव वनप्रदेशं प्राविशत् । (once)

(ii) .................. मित्रयोः न्यायशास्त्रं प्रियमासीत् । (2)

(iii) शाकुन्तलस्य .................. अङ्कः अतीव सुन्दरः अस्ति । (4th)

(iv) प्राचीनभारते .................. वर्णाः आसन् । (4)

(v) श्रावणमासे .................. तिथौ कृष्णजन्म भवति । (8th)

(vi) कबड्डीक्रीडायां सातत्येन ............... सुवर्णपदकं प्राप्तम् । (thrice)

## चतुर्थः विभागः - लेखनकौशल्यम् ।

**प्र.४ अधोनिर्दिष्टे कृती कुरुत ।**

**अ) वाक्यनिर्माणम् ।** ४

**कोष्ठकतः शब्दान् चित्वा अर्थसङ्गतानि ४ वाक्यानि लिखत ।**

| | | |
|---|---|---|
| अस्ति | सः | क्रीडाकुशलः / क्रीडाकुशला |
| अस्मि | सा | अध्ययनशीलः / अध्ययनशीला |
| असि | अहम् | गायकः / गायिका |
| आसीत् | त्वम् | संभाषणप्रवीणः / संभाषणप्रवीणा |

आ) **परिच्छेदपूर्तिः ।** ४

**मञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा परिच्छेदं पुनर्लिखत ।**

एकदा सर्वे ग्रामस्थाः सम्मिल्य एकस्य ग्रामीणस्य विषये चर्चाम् अकुर्वन् । बहुभिः जनैः स प्रशंसितः। अन्ततः एकः जनः अवदत् सः उत्तमः जनः अस्ति, इत्यत्र नास्ति .......... । परन्तु तस्मिन् द्वौ दोषौ वर्तेते इति मे प्रतिभाति । तच्छ्रुत्वा अपरः अपृच्छत् कौ तौ दोषौ ? ज्ञातुम् इच्छामि । सः शीघ्रकोपी तथा कोपावेशे सः कार्याकार्यविवेकं न रक्षति । .......... यस्य विषये वार्तालापः प्रचलितः आसीत् स एव तत्र आगतः । अन्तिमं वाक्यं तस्य श्रवणपथे आपतितम् । स्वस्य आलोचकस्य .......... उत्पत्य ग्रीवया तं गृह्णन् सः अपृच्छत्, रे शठ, मां .......... इति वदसि ?

(उपरि, सन्देहः, संयोगवशात्, शीघ्रकोपी)

**Best of Luck**